# रेणुका गीतम्

काव्यकण्ठवाशिष्ठगणपतिमुनिकृतम्

सुरशिरश्चरच्चरणरेणुका ।

जगदधीश्वरी जयति रेणुका ॥ 1

देवताशिरोदेशलालितम् ।

रेणुकापदं दिशतु मे मुदम् ॥ 2

कुण्दलीपुरीमण्डनं महः ।

किमपि भासतां मम सदा हृदि ॥ 3

मस्तकैतवं वस्तु शाश्वतम् ।

अस्ति मे सदा शस्तदं हृदि ॥ 4

आदिनारि ते पादपंकजम् ।

स्फुरतु मे मनः सरसिजे सदा ॥ 5

केवलं पदोः सेवकोऽस्मि ते ।

वेद्मि नेतरद्वेदसन्नुते ॥ 6

हृद्य तेऽणुनः समुचितोऽणुना ।

परिचयोऽम्बिका पादरेणुना ॥ 7

पाहि मुंच वा पादपंजम् ।

त्रिदशसन्नुते न त्यजामि ते ॥ 8

चरणमम्ब ते यो निषेवते ।

पुनरयं कुचौ घयति किं कृती ॥ 9

अहरहोऽम्ब ते रहसि चिन्तया ।

धन्यतां गतो नान्यदर्थये ॥ 10

स्मरजितो यथा शिरसि जाह्नवी ।

जननि रेणुका मनसि ते कृपा ॥ 11

अम्ब पाहि मां दम्भतापसि ।

पादकंजयोरादिकिंकरं ॥ 12

पुत्रमात्मनः पुण्यकीर्तने ।

बहुकृपे कुतो मामुपेक्षसे ॥ 13

अम्ब संस्तुते जम्भवैरिणा ।

पाहि मामिमं मग्नमापदि ॥ 14

तत्त्ववादिनः सत्त्वशालिनि ।

त्वामजे विदुः सत्स्वरूपिणीम् ॥ 15

त्वां प्रचक्षते सदयवीक्षिते ।

वेदवेदिनो मोदरूपिणीम् ॥ 16

संविदं विदुस्त्वामिदंप्रसु ।

परमयोगिनः परमदेवते ॥ 17

जननि कुण्डलीपुरनिवासिनि ।

परशुरामवत्पश्य मामिमम् ॥ 18

तनयशेदनं श्रवणशालिनि ।

श्रुणु सुरार्चिते यदि दया हृदि ॥ 19

याचकः सुतो भजनमीप्सितम् ।

तदपि दुर्लभं किमिदमम्बिके ॥ 20

मास्तु वेतनं छिन्नमस्तके ।

भजनमेव ते याच्यते मया ॥ 21

तरलतारया जलजदीर्घया ।

सानुकम्पया शीतपातया ॥ 22

केवलं दृशा पश्य रेणुके ।

तेन मे शुभं न च तवाशुभम् ॥ 23

किंकरीभवत्सुरविलासिनी ।

जयति कुण्डलीनगरवासिनी ॥ 24

मधुरमम्ब ते चरणपंकजम् ।

तत्र यद्रतैस्त्यज्यतेऽखिलम् ॥ 25

चरणमम्ब ते चरतु मे हृदि ।

इयमनामये प्रार्थना मम ॥ 26

भुजगकंकणप्रभृतिसंस्तुते ।

भुजभुवामरेर्जननि पाहि माम् ॥ 27

कुण्डलीपुरीमण्डनायिता ।

गणपतिस्तुता जयति रेणुका ॥ 28

फलस्तुतिः

सकलभयप्रशमनं दुरितक्षयकारिकांक्षितकरं च भवेत् ।

सुरसुंदरीजनसमर्पितयो र्हृदि रेणुकाचरणयो श्शरणं ॥

---